यात्रिक अं.नं.3

प्रयोग

संस्कार

सं॰यारा

# आराधन प्रयोग

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥अथाराधन.प्रयोग॥श्रीराम॥ ६॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

आपोवाइद५ंसर्वंविश्वाभूतान्यापःप्राणावाआपःपशवआ
पोन्नमापोमृतमापःसम्राडापोविराडापःस्वराडापश्छंदा५ंस्यापो
१ ॥श्रीगणेशायनमः॥प्रातःकृतनित्यक्रियःकर्त्तामध्यान्हेब्राह्मणान्न
(2) हूयशुचिराचम्यदेशकालौसंकीर्त्यश्रीनारायणप्रीत्यर्थंब्रह्मीभूतस्य
गुरोराधनंकरिष्यइतिसंकल्प्य॥ब्रह्मीभूतस्यगुरोःसमाराधनेगुर्वर्थे
भवद्भिःक्षणःकर्त्तव्यः॥एवंपरमगुर्वर्थेक्ष०परमेष्ठीगुर्वर्थेक्ष०
परात्परगुर्वर्थेक्ष०ततःशेशवार्थेभवद्भिःक्ष०कृष्णसंकर्षणार्थे
क्षण०इतिषोडशविप्रान्निमंत्र्यगंधाक्षततुलशीकर्पूरमिश्रजं
लेनब्रह्मीभूतगुरोःइदंतेपाद्यं॥एवंपरमगुरोइदंतेपा०परमेष्ठी
गुरोइदंतेपा०परात्परगुरोइदंतेपा०शेशवइदंतेपा०कृष्णसंक
र्षणइदंतेपा०इतिसर्वेषांपादप्रक्षालनानंतरंकृत्वातानाचम्यस्व
यंचाचम्यचपादप्रक्षालनोदकंपात्रांतरेगृहीत्वातत्पादौसाक्ष
तगंधपुष्पतुलसीदलैरभ्यर्च्य॥आनंदमानंदकरंप्रसन्नंज्ञान राम १
ज्योतीं५ष्यापोयजूं५ष्यापःसत्यमापःसर्वादेवताआपोभूर्भुवः
सुवरापओम्॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

स्वरूपं निज्ञबोधिरूपं॥ योगेंद्रमीड्यं भवरोगवैद्यं श्रीमत्गुरुं नित्य
महं नमामि॥ इति नमस्कुर्यात्॥ एवं सर्वेषां पादपूजनं कृत्वा गंधादिभिः
पादोदकपात्रमलंकृत्य देवसंनिधौ संस्थाप्येकु शासनेषु तान्प्राङ्
मुखानुदङ्मुखान्वा उपवेश्य पुरुषसूक्तस्य एकैकमंत्रेण ॐ नमो नारा
यणायेत्यनेन समुच्चितेनावाहनादिषोडशोपचारैः पंचोपचारै
र्वा पदार्थानुसमयेनाभ्यर्च्य ते गते ततो भोजनपात्रेषु पायसाद्यन्ना
नि परिविष्य गायत्र्या प्रोक्ष्य गुरवे इदमन्नं परिविष्टं परिवेक्ष्यमा
णं चान्नं तृप्तेः स्वाहा हव्यं न मम॥ एवं परमगुरवे इदमन्नं प॰ परात्प
रगुरवे इदमन्नं प॰ परमेष्ठीगुरवे इदमन्नं प॰ शुक्लेके ज्ञावायेदं
परिविष्टं॰ इति सर्वेभ्योन्नत्यागं कृत्वा ॐ तद्ब्रह्मेत्यनुवाकं ब्रह्मार्प
णं मंत्रं जपित्वा भोजनकाले उपनिषन्मंत्रान् श्रावयेत्॥ गीतापा
२ ॐ तद्ब्रह्म॥ ॐ तद्वायुः ॐ तदात्मा॥ ॐ तत्सत्यं ॐ तत्सर्वं ॐ तत्पुरो
र्नमः॥ अंतश्चरति भूतेषु गुहायां विश्वमूर्तिषु॥ त्वं यज्ञस्त्वं वषट्का

२
(3)

ठंच॥ तृप्तेषु ॐ नद्रमित्यनुवाकं जपित्वा आचांतेषूपविष्टेषु विशिष्ट
तांबूलदक्षिणादिभिरभ्यर्च्योपविष्टेष्वेवं तेषु गुर्वोराधनांगभूतं
तीर्थपूजां करिष्ये इति संकल्प्य गोमयेनु चतुरस्रमंडलं कृत्वा तन्
मरंगवल्यादिभिरलंकृत्य तन्मंडले कृत्वोपरि पादोदककलशं स्था
प्य तत्र गंगाद्यासर्वतीर्थान्यभिभावयित्वा पुरुषसूक्तेन प्रत्यृचं तीर्थाराजा
यनम इत्यंतेन षोडशोपचारैरभ्यर्च्य तत्पात्रं क्षीरसिंधुत्वा लोकः
सरस्वतीत्यनुवाकं शेषं भीषास्मादित्यनुवाकं च जपेत्॥ तो च॥ लोकः
सरस्वत्यां यास्येष वै देवयानः पंथास्तमेवान्वारोहत्याको शं नो या
त्यवत्तिमेवान्यस्मिन्प्रतिष्ठाय प्रतिष्ठां गच्छंति यदा दश शतं कु
र्वंत्यथैकमुत्थानं शतायुः पुरुषः शतेंद्रिय आयुष्येवेंद्रिये प्र
तितिष्ठंति यदा शतं सहस्रं कुर्वंत्यथैकमुत्थानं सहस्रसंमितो राम

२

(३/१)

वाअसौलोकोमुसेवलोकमभिजयतियंदेषांप्रभीयेतयदावाज्ञीये
रंनथैकमुत्थानंतद्धितीर्थं॥भीषास्माद्वातःपवते॥भीषोदेतिसू
र्यः॥भीषास्मादग्निश्चेंद्रश्च॥मृत्युर्धावतिपंचमइति॥सैषा
नंदस्यमीमांसाभवति॥युवास्यात्साधुयुवाध्यायकः॥आशि
ष्ठोदृढिष्ठोबलिष्ठः॥तस्येयंपृथिवीसर्वावित्तस्यपूर्णास्यात्॥
सएकोमानुषआनंद॥तेयेशतंमानुषाआनंदाः॥सएकोमनु
ष्यगंधर्वाणामानंदः॥श्रोत्रियस्यचाकामहतस्य॥तेयेशतंम
नुष्यगंधर्वाणामानंदाः॥सएकोदेवगंधर्वाणामानंदः॥श्रोत्रि
य०॥तेयेशतंदेवगंधर्वाणामानंदाः॥सएकःपितृणांचिरलो
कलोकानामानंदः॥श्रोत्रि०तस्य॥तेयेशतंपितृणांचिरलोक
लोकानामानंदाः॥सएकआजानजानांदेवानामानंदः॥श्रो

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

३

(h)

त्रिय॰स्य॥ तेयेशतमाजानजानां देवानामानंदाः॥ स एकः कर्म
देवानामानंदः॥ येकर्मणा देवानपियंति॥ श्रोत्रिय॰स्य॥ ते
येशतंकर्मदेवानांदेवानामानंदाः॥ स एको देवानामानंदः॥ श्रो
त्रिय॰स्य॥ तेये शतं देवानामानंदाः॥ स एक इंद्रस्यानंदः॥ श्रो
त्रिय॰स्य॥ तेये शतमिंद्रस्यानंदाः॥ स एको बृहस्पतेरानंदः॥
श्रोत्रि॰स्य॥ तेये शतं बृहस्पतेरानंदाः॥ स एकः प्रजापतेरानंदः॥
श्रोत्रि॰स्य॥ तेये शतं प्रजापतेरानंदाः॥ स एको ब्रह्मण आनंदः॥
श्रोत्रि॰स्य॥ स यश्चायं पुरुषे॥ यश्चासावादित्ये॥ स एकः॥
स य एवंवित्॥ अस्माल्लोकात्प्रेत्य॥ एतमन्नमयमात्मानमु
पसंक्रामति॥ एतं प्राणमयमात्मानमुपसंक्रामति॥ एतं म
नोमयमात्मानमुपसंक्रामति॥ एतंविज्ञानमयमात्मानमु

राम

३

(4A)

पसंक्रामति॥एतमानंदमयमात्मानमुपसंक्रामति॥तद
प्येषश्लोकोभवति॥इतिजपित्वाहरिकीर्त्तनपुरःसरंसहर्षनृ
त्यंकृत्वातत्पात्रंपुनर्मंडलेसंस्थाप्यपूजावशिष्टगंधपुष्पाणि
बंधुभिःसहस्वयंधृत्वाविप्रान्प्रदक्षिणीकृत्यआनंदेमानंदे
तिपूर्वश्लोकं॥गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुर्देवोमहेश्वरः॥गुरुरे
कपरंब्रह्मतस्मैश्रीगुरवेनमः॥॥इतिमंत्रैर्द्विजास्तीर्थैराज्ञंच
नमस्कृत्यगुर्वनुज्ञया॥विप्रहस्तेपादोदकपात्रंदत्वातदाज्ञया
तद्दत्ततीर्थमंत्रेणगृह्णीयात्॥मंत्रस्तु॥अविद्यामूलशमनं
सर्वपापप्रणाशनं॥गुरोःपादोदकंचित्रंसंसारद्रुमनाशनं॥
पुत्रादिकामनायांतु॥शोषणपापपंकस्यदीपनंज्ञानतेजसा॥
गुरुपादोदकंचित्रंपुत्रपौत्रप्रवर्धनं॥इतिगृह्णीयात्॥ततन

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

स्तान् प्रणम्य तानन्यांश्च दक्षिणाभिस्तोषयित्वा सज्जनपुरःसरं तान
नुव्रज्य कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुंजीत॥ ततः प्राहदर्शीमाहात्म्
यतीर्थप्रयुक्तादिश्राद्धानि कुर्यात्॥ प्रतिमासमेवाराधनं॥ प्रत्यब्द
मपि पार्वणोत्तरं पाकांतरेण चाराधनमनेनैव विधिनेति॥ ॥इति
संक्षिप्तउपोद्घात इति संस्कारप्रयोगः॥ शाके १७७१ सौम्यनामाब्दे
श्रावणकृष्णचतुर्दश्यां गुरुवारे तद्दिने इदं पुस्तकं समाप्तं॥ ५॥

# मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com